# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (२१)

१८.०३.२०१३

# ५१९. पाककर्णपर्णपुष्पफलमूलवालोत्तर-पदाच्च (४.१.६४)

- पदद्वयम् । पाक-कर्ण-पर्ण-पुष्प-फल-मूल-वालोत्तरपदात्, च ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति, 'जातेरस्त्रीविषयादयोपधात्' (४.१.६३) इत्यतः 'जातेः' इति च अनुवर्तते ।
- पाकाद्युत्तरपदात् जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात् ।
- ओदनपाकी । शङ्कुकर्णी । शालपर्णी । शङ्खपुष्पी । दासीफली । दर्भमूली । गोवाली ।
- ओषधिविशेषे रूढा एते ।
- अवयवव्युत्पत्तिरहिता इत्यर्थः ।

# ५२०. इतो मनुष्यजातेः (४.१.६५)

- पदद्वयम् । इतः, मनुष्यजातेः ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति अनुवर्तते ।
- ङीष् स्यात् ।
- ङीष् स्यादिति ।
- दाक्षी ।
- दाक्षीति ।
- योपधादपि ।
- योपधादपीति ।
- उदमेयस्यापत्यं स्त्री औदमेयी ।

- मनुष्येति किम्?
- तित्तिरिः ।
- तित्तिरिरिति ।

# ५२१. ऊङुतः (४.१.६६)

- पदद्वयम् । ऊङ्, उतः ।
- 'जातेरस्त्रीविषयादयोपधात्' (४.१.६३) इत्यतः 'अयोपधात्' इति, 'इतो मनुष्यजातेः' (४.१.६५) इत्यतः 'मनुष्यजातेः' इति च अनुवर्तते ।
- उकारान्ताद्, अयोपधाद्, मनुष्यजातिवाचिनः स्त्रियाम् ऊङ् स्यात् ।
- कुरूः ।
- 'कुरुनादिभ्यो ण्यः' (४.१.१७२) ।
- तस्य 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' (४.१.१७६) इति लुक् ।
- कुरूरिति ।

- अयोपधात् किम्?
- अध्वर्युः ।
- अध्वर्युरिति ।

# अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम् (वा)

- अप्राणिजातेश्चेति ।
- अर्थात्, रज्ज्वादिगणे पठितानां ऊङ् न भवति, प्राणिजातिवाचकानाम् ऊङ् न भवति अनेन वार्त्तिकेन ।
- रज्ज्वादिपर्युदासाद् उवर्णान्तेभ्य एव ।
- रज्ज्वादिपर्युदासादिति ।
- 'नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः' (प) ।
- न हि अब्राह्मणमानय इत्युक्ते लोष्टमानीय कृती भवति ।

- अलाब्वा ।
- कर्कन्ध्वा ।
- अलाब्वेति ।
- अनयोः दीर्घान्तत्वेऽपि ‘नोङ्धात्वोः’ ति विभक्त्युदात्तत्वप्रतिषेधः ऊङः फलम् ।
- प्राणिजातेस्तु कृकवाकुः ।
- कृकवाकुरिति ।
- रज्ज्वादेस्तु रज्जुः, हनुः ।

# ५२२. बाह्वन्तात्संज्ञायाम् (४.१.६७)

- पदद्वयम् । बाह्वन्तात्, संज्ञायाम् ।
- 'ऊङुतः' (४.१.६५) इत्यतः 'ऊङ्' इति अनुवर्तते ।
- स्त्रियाम् ऊङ् स्यात् ।
- भद्रबाहूः ।
- संज्ञायां किम्?
- वृत्तबाहुः ।

# ५२३. पङ्गोश्च (४.१.६८)

- पदद्वयम् । पङ्गोः, च ।
- ‘ऊङुतः’ (४.१.६५) इत्यतः ‘ऊङ्’ इति अनुवर्तते ।
- पङ्गोश्च इति ।
- पङ्गूः ।

# ‘श्वशुरस्योकाराकारलोपश्च’ (वा)

- चादूङ् ।
- पुंयोगलक्षणस्य ङीषः अपवादः ।
- श्वशुरस्येति ।
- लिङ्गविशिष्टपरिभाषया स्वादयः ।
- लिङ्गविशिष्टेति ।
- श्वश्रूः ।